Shri Raghunatha Temple MSS. Library,
JAMMU

५८०९४

No. १३३० / क

Title महात्रिपुरसुन्दरी पटल:

Author

Extent २० पत्र   Age

Subject तन्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

#5790

श्रीविद्यामार्तण्ड

F-120

Complete

© Dharmartha Trust J&K. Digitized by eGangotri

१८१

प. १

ॐ नमो भगवते शिवमूर्तये नमः श्रीदेव्युवाच ॐ भगवन्स
र्ववेत्तात्वं जगतामुपकारकः देवादिदेव देवेश त्रैलोक्याभ
यदायक श्रीकण्ठ शरसंस्थ मे महादेवनोवरस्त्वया नदद्यक्तु
पद्यासंभोसम्प्रदातंत्तमोभव श्रीभैरवउवाच देविसम्यंवेत्ता
दत्तोदेवदानवसंगरे यत्तेमनसिभीष्टंतत्तंवरयस्वत्रते
श्रीदेव्युवाच भगवन्सर्वधर्मज्ञसकलागमपारग देवदे
वीमहादेवीमहात्रिपुरसुंदरी त्रिकूटाषोडशीदेवीश्रीवि

© Dharmartha Trust J&K. Digitized by eGangotri

द्याब्रह्मरूपिणी तस्याः पंचांगमखिलं साग्रात्साधयेतमोत्तमं
वद शीघ्रं महादेव यद्यहं प्रेयसी तव श्रीभैरव उवाच लक्ष
वारं सहस्राणि वारितासि पुनः पुनः स्त्रीस्वभावान्महादेवि
पुनस्त्वं परिपृच्छसि अद्याहं कृपया देवि तव प्रीत्या महेश्वरि
महात्रिपुरसुन्दर्याः पंचांगं तेब्रवीम्यहं श्रीविद्यात्रिपुरादेवी
जगच्चैतन्यरूपिणी त्रिकूटा षोडशी विद्या महाश्रीषोडशाक्ष
री या देवदेवीजगतां सृष्टिस्थित्यन्तकारिणी सा महाषोड

© Dharmartha Trust J&K. Digitized by eGangotri

प० श्रीविद्यामहात्रिपुरसुंदरी राज्यं देयं शिरो देयं देया संतति
२ रर्थिने वस्तुरूपं शरीरं देयं न देया षोडशाक्षरी गोप्यं गोप्यत
2 मं विद्यां श्रीभैरवशरजन्मनः गृह्णाति गोप्यं गोपनं गोप्या सा यथा
कात्रेन गोपयेत् त्रिपुरश्रीमहाविद्याप्रभावसहिता कलौ
भवश्यारूपिणी विद्या बाला भुवनेश्र्योदिकाः अन्तरी त्रिपुरा
बाला भुवापंचदशाक्षरी श्रीपादि त्रिकूटाख्यो विद्यामहाश्रीषो
डशाक्षरी महाश्रीषोडशाक्षर्याः पंचांगं वक्ष्यमादरं महा

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीषोडशाक्षर्याः मंत्रोद्धारं ब्रवीम्यहं यंत्रोद्धारं तथा ध्यानं
प्रयोगानहं वक्ष्म्यहं यथा लक्ष्मीः परा मदनवाग्भवशा
क्तिशक्तानां रेच श्रुतिकमलाकथितापि विद्या शक्रादि
कं तु विपरीतं तथा च प्रोक्तं श्रीषोडशाक्षरविधिः श्रमदोस्त
रणेः इति मंत्रोद्धारः अस्याः श्रीषोडशाक्षर्या भ्रमदोषो न
विद्यते मंत्रोत्कीलनदोषो वा मंत्रे संजीवनस्य च संपुटस्य वि
नादे विप्ररक्षणकर्मणा गरुडलेन वादे विमायकस्य करेण

© Dharmartha Trust J&K. Digitized by eGangotri

प. वा ग्रास्थ्यंयोप्रकाशीतवर्णालक्षंजपावपि नकदाचित्प्रका
३ शीतस्यहस्तेनचसाधकः नतिथिर्नवनक्षत्रंनांगन्यासस्य
मंत्रिणां नवारदोषोनविघ्नोनशौचंनियमोनच साक्षादमृ
तरूपोयंमंत्रःषोडशाक्षरः ऋषिःस्याद्दक्षिणामूर्तिःपंक्ति
छंदउदाहृत देवताचमयाप्रोक्तामहात्रिपुरसुंदरी लक्ष्मी
बीजंपराशक्तिःकामराजस्तुकीलकं चतुर्वर्गेषुविद्यायावि
नियोगःप्रकीर्तितः यंत्रोद्धारंप्रवक्ष्यामिसर्वाशापरिपूरकं

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वसंमोहनंयंत्रं सर्वसिद्धिप्रदायकं अथयंत्रोद्धारः विं
दुत्रिकोणवस्वकोणदशारयुग्ममन्वस्त्रनागदलसंगत
षोडशारं वृत्तत्रयं च धरासद्मत्रयं च श्रीचक्रराजउदि
तःपरदेवतायाः इति अथध्यानंप्रवक्ष्यामिसर्वतंत्रेषुगो।
पितं सारंत्रिपुरसुंदर्याःसर्वस्वंममपार्वति येनध्यानेनस
कलंजगत्संमोहितंकृतं यस्मिन्देवेशिब्रह्मांडंकराहाते
विलीयते। उक्तमहेमकूटविराटरविचंद्रवह्निनेत्रांपत्रःशार

प.
४

युक्तांकुशाकामपाशान् रक्तैर्भुजैस्त्वदयन्तीं शिवशक्तिरूपां
कामेश्वरीं हृदि भजामि धृतेन्दुलेखां इति ध्यानेऽप्यनेन ध्या
नमात्रेण ब्रह्माविष्णुहरः शिवे ब्रह्मादयः स्वगणाज्जाता।
निःस्पंदवल्लघः कथयाम्यद्य देवेशि स्तंभनादिविधिं वरं यं
विधाय महेशानि साधको योगवान्भवेत् स्तंभने मोहने चैव
मारणाकर्षणे तथा वशीकारोच्चाटने कौ शांतिके पौष्टिके त
था सांतानिके मौक्तिके च प्रयोगा दश कीर्तिताः स्तंभने रविवा

© Dharmartha Trust J&K. Digitized by eGangotri

रेतस्त्राज्ञाजस्त्रामंत्रं शिवे यस्तुच्चार्यभवेद्रुणं स्तंभनं त्वरितं
कलौ तारं रमां परां तारं क्रूरत्रयमुदीरयेत् तारं परां रमां तारं फ
ट् स्तंभनकरो ह्ययं प्रकाशः ॐ श्रीं ह्रीं ॐ कपर्दिल ह्रीं ह्सक
ह्ल ह्रीं सकल ह्रीं ॐ ह्रीं श्रीं ॐ फट् गतेः सूर्यस्य चंद्रस्य वह्नि
वातादिपाथसां रिपुसैन्यादिदस्यूनां स्तंभनं जायते ध्रुवं इति स्तं
भनं खौ स्त्रात्वा नदीतीरे जपेन्मूलं महेश्वरि यस्योच्चारणमात्रे
णामोहमेष्यति भैरवि: तारं कामः शरं तारं क्रूरत्रयमतः परं

© Dharmartha Trust J&K. Digitized by eGangotri

प. शारिकामंत्रनस्तारंफट् मोहनमंत्रस्ततः प्रकाशः ॐह्रींसौः
९ ॐकएईलह्रींहसकहलह्रींसकलह्रींसौःक्लींॐफट् देवा
नांवनरेणानांस्त्रीणामप्सरसांतथा सद्योदर्शनमात्रेणमोह
नेजायतेध्रुवं इतिमोहने। रवौश्मशानेमंत्रस्यजपंकृत्वामहे
श्वरि आनीयभस्मतुष्टिंचक्षिपेच्छत्रुगेहेपथि सप्ताहान्म्रिय
तेशत्रुःसाधकस्यनसंशयः। तारंकालीवकूर्चंचविकृटाय।
दस्तुद्वयेन कूर्चंकालीतथातारंफट्मारणमंत्रःस्ततः प्रकाशे
ॐक्रींहूंकएईलह्रींहसकहलह्रींसकलह्रींहूंक्रींॐफट् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

नृपोवारणभूम्योवाविप्रोवाक्षत्रियोपिवा शत्रुःकालसमानो
पिमत्स्मेष्यतिभैरवि रवौमंत्रंजपेत्प्रातःकामीसाधकसत्त
मः रंभाद्यप्सरसांदेविभवेदाकर्षणंतथा तारंमारंवाग्भवंच
कूटत्रयमुदीरयेत् चंद्रंमारंतथातारंफडाकृष्टिमंत्रःस्मृतः
प्रकाशे ॐऐंक्लींऐंकएईलह्रींहसकहलह्रींसकलह्रींऐंक्लींॐफ
ट् अस्योच्चारणमात्रेणसकृदाकर्षणंभवेत् रंभास्वर्गस्थिता।
वापिप्रातःप्रादुर्भविष्यति रवौमध्याह्नसमयेस्नात्वामूलंजपे

© Dharmartha Trust J&K. Digitized by eGangotri

प. ब्धिवे जप्ताशीघ्रं वशं याति त्रैलोक्यं सचराचरं तारं परं स्मरं ता
६ रं कूटत्रयं महेश्वरि तारं स्मरः परं तारं फट् वशीकारकः स्मृतः
6 ॐ ह्रीं क्लीं ॐ कएईल ह्रीं हसकहल ह्रीं सकल ह्रीं ॐ क्लीं ह्रीं ॐ
फट् अस्योच्चारणमात्रेण देवा अपि महेश्वरि सद्यः किंकरतां।
यान्ति किं पुनः क्षुद्रभूमिपाः इति वशीकरणं एवं गत्वा श्मशा
ने तु जपेन्मंत्रं महेश्वरि यज्जप्तेन भवेत् क्षिप्रं उच्चाटनमरिंदम
तारं लज्जेश्वर कामः कूटत्रितयमुच्चरेत् कामः शक्तिस्मरं तारं

© Dharmartha Trust J&K. Digitized by eGangotri

फट्स्फोटनकेस्मृतः प्रकाशः ॐ ऐं सौः क्लींकएईलह्रींहस
कहलह्रींसकलह्रींक्लींसौः ऐंॐफट् दशवारप्रजप्तेनमंत्रे
णपरमेश्वरि त्रिपुरस्फोटयेदेविस्नावेभौममपिप्रिये स्फ
ोटने स्वौजपेन्मंत्रेदेविदशवारंयथाविधि त्रिवारंसर्व
रोगाणांसद्यः शांतिर्भविष्यति तारंशारत्पराकामंकूटत्रय।
सद्घरेत् कामःपराशरतारंफट्शांतिककरःस्मृतः ॐ
सौः ह्रींक्लींकएईलह्रींहसकहलह्रींसकलह्रींक्लींह्रींसौः

© Dharmartha Trust J&K. Digitized by eGangotri

प. ॐ फट् रोगाणामतिवृष्टीनां ग्रहाणां सर्वदिते उपद्रव
८ स्य सर्वस्य सघः शांतिर्भविष्यति इति शांतिकं रवौ स्नात्वा
जपेन्मूलं दशवारं महेश्वरि पिपासां कितद्दिग्भागे महा।
पुष्टिः प्रजायते तारं सारं स्मरं ल्तारं कूटत्रयं महेश्वरि तारं
स्मरो मारतारौ फट् पौष्टिककरः स्मृतः ॐ ह्रीं ह्रीं ॐ कए
ईलह्रीं हसकहलह्रीं सकलह्रीं ॐ ह्रीं ह्रीं ॐ फट् उर्वलानां
नराणां च पितृणां च दिवौकसां सकृदुच्चारमात्रेण महापुष्टिः

© Dharmartha Trust J&K. Digitized by eGangotri

प्रजायते इति पौष्टिकं। एवौ जपेन्मन्त्रं देवि साधको देवता
गृहे येन जप्तेन वंध्याया भवेत्सुतो ऽन्वयेश्वरः तारं शारछर
तारं कूटत्रितयमुच्चरेत् तारं शारछरसं तारं फट्च सांतानि।
कोमन्त्रः प्रकाश ॐ सौः सौः ॐ कएईलह्रीं हसकहलह्रीं।
सकलह्रीं ॐ सौः सौः ॐ फट् वंध्यायाः काकवंध्यायाश्च तनु
जाः स्वेरपरि पुत्रा भवंति भूमीशाः स्वकुलैकप्रधानकाः इति
सांतानिकं। एवौ प्रातर्जपेन्मंत्रं तन्मन्त्ररूपं महेश्वरि यस्योच्चा

© Dharmartha Trust J&K. Digitized by eGangotri

पृ. ८
रणमात्रेणमौक्तिकंजायतेध्रुवं नारंरमारमानारंक्रूरत्रयमु
दीरयेत् नारंरमारमानारंफट्मौक्तिककरोस्त्वयं ॐश्रींश्री
ॐकएईलह्रींहसकहलह्रींसकलह्रींॐश्रींश्रींॐफट् इति
मौक्तिकम् । इदंहिममसर्वस्वंरहस्यंत्रिदिवौकसां गोप्यंगुह्य
तमंदेविनप्रकाश्यंकदाचन इतिदशप्रयोगाः अधुनादेविव
क्ष्यामिस्रजापटलमीश्वरि श्रीदेव्याःषोडशान्तर्याःस्रजामानस्मि
कीचरेत् सूतकेमृतकेवापिपथिकांनारमंडले म्लेच्छस्पर्शेच

© Dharmartha Trust J&K. Digitized by eGangotri

कारायां संकेटरणमंडले मनसैव चरेत्सज्जां त्रिकूटायाम हेश्व

रि पूरणं त्वं भक्तिभावेन यथावदर्पितं मया अन्यायशयनादे

विश्वासे दिव्यमुहूर्तके प्रबुद्धः स्वगुरुं हृत्सन्नां ग्रीनाचमर्षिम हे

श्वरि प्राणायामत्रयं कृत्वा गुरुं ध्यात्वा सशक्तिकं देवीकामेश्वरां

कोपविष्टां कामेश्वरीं स्मरेत् ध्यात्वा पूर्वेण षड्दीर्घैर्न्यासं कृत्वा ॥

यथाविधिः जपेन्मूलं च गायत्रीं गुरवे च समर्पयेत् प्रागास्यवह्नि

ह्रींकारं जपनारायणमूर्तिम् नवमुद्रादि संनमस्य वर्णौं फं शौ चमा

© Dharmartha Trust J&K. Digitized by eGangotri

प. चरेत् रमावीजेनसंशोध्य दंतान्साधकसत्तमः मायावीजेनगं
९ डूषत्रयंकुर्यान्महेश्वरि मूलेनदेवितीर्थानितदावाह्यस्वसिद्ध
१ ये ॐगंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधुकावेरिज
लेस्मिन्सन्निधिंकुरु रमावाह्यमहादेविदेवीमावाहयेत्ततः मू
लेनत्रिःसप्तत्स्रजानघेमसिमहेश्वरि ततोमूलंजपेन्मंत्रीगाय
त्रींचविशेषतः सूर्यायार्घ्यत्रयंदद्यादेवदेव्योस्तथैवच ॐत्रिपुरे
देविविद्महेह्यादिकूटसमन्विते कामेश्वरिधीमहिचद्वितीय

© Dharmartha Trust J&K. Digitized by eGangotri

कूटभूषिते त्रितयकूटपूर्वं च ततः क्लिन्नाप्रचोदयात् प्रकाशं
कएईलह्रीं त्रिपुरे देवि विद्महे हसकहलह्रीं कामेश्वरि धीम
हि सकलह्रीं तन्नः क्लिन्ना प्रचोदयात् १ जलादाहृत्य वासांसि
परिधाय च साधकः संध्यां स मनसा कृत्वा वाचमर्षणपूर्वकं सं
ध्यां निर्वर्त्य देवेशि यागगेहं ततो व्रजेत् ततो द्वारार्चनं कृत्वा ऊर्या
दासनशोधनं भूतशुद्धिं ततः कृत्वा प्राणार्पणविधिं ततः षोड
शार्णासमभागेन देहे देवमयं चरेत् मनसा वर्णभागोक्तं षीवकं तत

© Dharmartha Trust J&K. Digitized by eGangotri

प. त्रभावयेत् विंदुत्रिकोणवसुकोणदशारयुग्ममन्वस्रनागद
१० लसंगतेस्यादिप्राग्क्रमम् विभाव्यतत्रश्रीचक्रंहृदयेस्माथको
नमः योगपीठंततोभ्यर्च्याहंतंयंरंलंवंइति विंदौकामेश्वरां
१० कोपविष्टांकामेश्वरींस्मरेत् पात्राणिस्थापयेत्तत्रत्रिकोणेज
लनिर्मिते चतुरस्रंमंडलंचविधायगंधयुक्तांबुभिः सामान्यार्घ्यं
त्रिकूटाणांमंडलंपूजयेच्छिवे चतुरस्रंमंडलेचसमभ्यर्च्यच
रेततः ॐंग्लस्रायफडितिमेवमंत्रस्थाप्यात्रत्रिपादिकां नत्रास्तत्रा

© Dharmartha Trust J&K. Digitized by eGangotri

लितं शंखं समभ्यर्च्य तथास्त्रयीः तत्रार्कमंडले देवि सोमवह्नौ ।
त्रमंडलं संहस्य मूलमंत्रेण कलास्तेषां समर्चयेत् म...गाह्यमंत्रि
तं देवि विधाय तीर्थवारिणा तेनार्घ्यं शिवे शंखं शंखमुद्रां नि
वेद्य च तीर्थमावाह्य देवि शिखुर्हं तत्रैव भावयेत् सामान्यार्घ्यमेवा
मृतशोभितं कलशं शिवे अस्त्रं चैव षडस्त्रं वह्निं तत्र यास्त्र मंडले १
ध्यात्वा तैः समभ्यर्च्य तत्र कूटत्रयेण च षडंगन्यासभागेन समभ्यर्च्य
षडस्त्रकं चतुरस्रं तथाभ्यर्च्य संख्याप्यात्रिपादिकां कलाः स्वर्यैं ड

© Dharmartha Trust J&K. Digitized by eGangotri

प० क्तीनां समभ्यर्च्य यथाविधि कलशेस्मिन्महादेवि देवीं संपूजये
११ त्सरो आनंदभैरवं चैव देवि कूटत्रयेण च मायारमाकामबीजैर्य
त्रयुक्तं प्रदर्शयेत् मत्स्यमुद्रादिनाछाद्य सामान्यार्घ्यस्य दक्षिणे
कलशार्द्धमंडलं च विधायानं महेश्वरि शक्तिपात्रं समायायमू
लेनाष्टाभिमंत्रितं नैवेद्यं ब्राह्मणीपात्रं तथा वटुकपात्रकं गुरुपात्रा
दिषु पूर्यं तीर्थं शंखादयोप्ययः पंचाकारेण देवेशि पात्राणि स्था
पयेत्ततः पाद्यार्घ्यमधुपर्काचमनीयपात्रपूजनं विधाय ततश्श्री

© Dharmartha Trust J&K. Digitized by eGangotri

देव्यान्यासं षडंगपूर्वकं मणिहरेत्रस्तां प्रेमूलायाम् रिके शिवे
शिवशक्त्योः सामरस्यविभावनमात्रकेश्वरः ततः कामकलारूप
विग्रहीकृतविग्रहः शिवशक्त्योः पादुकां च तर्पयामि नमः इति
समयादेवि संतर्प्य ततः क्रमत्रयेण च सर्वं तन्नाड्यष्टकशक्त्या याः पूज
नीयास्तर्पणैः संतर्पयेत् हृल्लत्रदिव्यौघादीन्महेश्वरि पराश
क्तियुताः पूज्याः स्त्रीत्यर्था वा नाम महेश्वरि तन्त्रत्रयेण वा चक्रे शिवप
वमवेत्स्वयं श्रीचक्रे देवदेव्योस्तु रूपध्यानाद्विवर्णकं ध्यापनं

© Dharmartha Trust J&K. Digitized by eGangotri

प॰ सं[illegible]यां[illegible]सकलीकरणं विधाय मुद्राभिः साधकः कृत्वा देवीसमुद्रा
१२ ध्यमुद्रया देव्यै देवाय मूलेन प्राणान्दत्वा महेश्वरि शिवशक्त्योः परं
12 रूपं ध्यात्वा पूजां समाचरेत् तदादौ देवदेव्योः स्वपाद्यार्घ्यादीन्निवेद
येत् मधुपर्कं निवेद्यापि निवेद्याचमनीयकं नानालंकारवस्त्राणि
निवेद्य साधको नमः नैवेद्याचमनीयादि शिवशक्त्योर्निवेदयेत्
दीपधूपादि संभाव्य परमान्नं निवेद्य च तांबूलं च मुखे दत्वा स्वकरा।
भ्यां चैव तर्पयेत् पुष्पांजलिं च पश्चाच्चक्रे दत्वा पूजां समाचरेत्

© Dharmartha Trust J&K. Digitized by eGangotri

आद्यैकामेश्वरीनित्यांएजयेद्भगमालिनीं निम[illegible]ंवरुं
ज्ञभीरुंडांचमहेश्वरि श्रीवह्निवासिनींनित्यांमहाविद्येश्वरी
ततः शिवदूतींमहेशानित्वरितांएजयेततः श्रीकुलसुंदरींनि
त्यांनित्यानित्यांततःपरं ततोनीलपताकांचविजयांचमहेश्व
रि श्रीसर्वमंगलांनित्यांज्वालामालांततःपरं चित्रांनित्यांमहेशा
नित्रिकूटांएजयेत्क्लिवे पुनःपुष्पांजलिंदत्वाश्रीविद्याएषभागयो
गुरुपंक्तिंचयीएज्ञानपणीयाएष्यकरथक गुरुएज्ञांविद्यायाय

© Dharmartha Trust J&K. Digitized by eGangotri

प. त्रिपुरं [illegible]येत्ततः त्रिपुरां पूजयाम्यहं तर्पयामि नमः इति तत्रा
१३ द्यौ पूजा[illegible]देवि ऐं ह्रीं सौः त्रिपुरेश्वरी त्रिपुरसुंदरी देवि ततस्त्रि
13 पुरवासिनी त्रिपुराश्रीयजेन्मेशी ऐं क्लीं त्रिपुरमालिनी ह्रीं श्रीं
सौः त्रिपुरांसिद्धां पूजयेत्त्रिपुरांबिकां पूजयेन्मांत्रिको मंत्रैः महा
त्रिपुरसुंदरी इति श्रीचक्रस्यादिदेवं देवानेव पूजयेत् नवचक्रे
षुदेवेशि नवचक्रेश्वरी पुनः पूजनीयाश्च योगिन्यो वामावर्तेन
पार्वति अणिमाद्यास्तथा सिद्धीः पूजयेन्साधको नमः ब्राह्म्या

© Dharmartha Trust J&K. Digitized by eGangotri

द्यामातरः एत्याश्चैवास्य परमेश्वरि सर्वसंक्षोभिणी[illegible]नवमुद्राः

प्रपूजयेत् ततो मूलेन श्रीविद्यां संतर्प्य परमेश्वरि पुष्पांजलिं।

च श्रीचक्रे दत्वा सुष्टदलैरर्चयेत् सर्वाशापरिपूरकाय श्रीचक्राय

महेश्वरि दद्यात्पुष्पांजलिं दिव्यां ततः संपूजयेच्छिवे ह्रीं श्रीं का

माकर्षिणीं च नित्याकलापदां चितां अं आं इं बुद्ध्याकर्षिणीं च तथा

हंकारकर्षिणीं ईं ईं शब्दाकर्षिणीं च तथा उं स्पर्शाकर्षिणीं ऊं रूपा

कर्षिणीं नित्यां ऋं रसाकर्षिणीं तथा ॠं गंधाकर्षिणीं नित्यां लृं चि

© Dharmartha Trust J&K. Digitized by eGangotri

प॰ त्नाकर्षिणीं तथा ऌं धैर्याकर्षिणीं नित्यां एं स्मृत्याकर्षिणीं तथा
१४ ऐं नामाकर्षिणीं नित्यां ओं बीजाकर्षिणीं तथा औं आत्माकर्षिणीं नित्यां
अं अमृताकर्षिणीं तथा अः शरीराकर्षिणीं च षोडशारे प्रपूजयेत् मू
ले देवीं महादेवि संतर्प्य सायकोन्नमः सर्वसंक्षोभके चक्रे दलाष्टकां
जले ततः अनंगकुसुमां देवीमनंगमेखलेति च अनंगमदनां देवी
मनंगमदनातुरां संस्मृत्यानंगरेखां च संस्मृत्यानंगवेगिनी अनंगांकुशा
संस्मृत्या संस्मृत्यानंगमालिनी संस्मृत्याष्टदले देवि मूलदेवीं च तर्पयेत्

© Dharmartha Trust J&K. Digitized by eGangotri

शिवशक्तीसाधकेशाः प्रणमेद्योनिमुद्रया ३ एतत्तु[illegible]स्थितयं ध्या
येच्चंद्रस्वरूपकं सर्वसौभाग्यदायाख्यश्रीचक्रायमहेश्वरि [illegible]
गलिंमंत्रीपूजयेत्साधकोत्तमः सर्वसंक्षोभिणीशक्तिः सर्वविद्रावि
णीतथा श्रीसर्वाकर्षिणीशक्तिः सर्वह्लादनकारिणी सर्वसंमोहि
नीशक्तिः सर्वस्तंभनकारिणी श्रीसर्वजृंभिणीशक्तिः सर्ववशंक
रीततः श्रीसर्वरंजनीशक्तिः सर्वोन्मादनरूपिणी सर्वार्थसाधनीश
क्तिः सर्वसंपत्प्रपूरिणी सर्वमंत्रमयीशक्तिः सर्वद्वंद्वक्षयंकरी संपूज्या

© Dharmartha Trust J&K. Digitized by eGangotri

प. १५

15

सायकैर[illegible]र्त्नेन पार्वति कामेश्वरीवसंततर्प्यप्रणमेद्योनिमु
द्रया सर्वार्थ[illegible]कायाद्यचक्रायसायकोनमः पुष्पांजलिंततोद
द्यान्मूजयेत्सिद्धिदेवताः सर्वसिद्धिप्रदादेवी सर्वसंपत्प्रदातथा स
र्वप्रियंकरीदेवी सर्वमंगलकारिणी सर्वकामप्रदादेवी सर्वदुःख
विमोचिनी सर्वमृत्युप्रशमनी सर्वविघ्नविनाशिनी सर्वांगसुंदरी
देवी सर्वसौभाग्यदायिनी गंधाद्यैःसमभ्यर्च्यतर्पयेन्मूलदेवतां
कामेश्वरीवदेवेशि प्रणमेद्योनिमुद्रया सर्वरत्नाकरायाद्यचक्रायस

© Dharmartha Trust J&K. Digitized by eGangotri

एवं दिते दत्वा पुष्पांजलिं देवि पूजयेत्साधकोत्तमः [illegible] श्री सर्वज्ञ
ता देवी सर्वशक्तिस्ततः परं सर्वैश्वर्यप्रदा देवी सर्वज्ञानमयी ततः
ततः संपूजनीया च सर्वव्याधिविनाशिनी सर्वाधारस्वरूपा च सर्वपा
पहरा ततः सर्वानंदमयी देवी सर्वरक्षास्वरूपिणी महादेवि महादे
वी सर्वेप्सितफलप्रदा इति संपाद्य ततः पश्चा मूलदेवीं च तर्पयेत् सं
तर्प्य सर्वशिवां देवीं प्रणमेद्योनिमुद्रया एतद्द्वितीयचक्रं तु सर्वसंपत्प्रपू
रेत् हृदि सर्वरोगहराय च चक्राय नवरूपिणे दत्वा पुष्पांजलिं देवि।

© Dharmartha Trust J&K. Digitized by eGangotri

प. एजयेदेवता हृत्कं वशिनीवाग्देवताद्यौ कामेश्वरी ततः शिवे मोदिनी
१४ वाग्देवता विमलाप्यरुणा ततः जयिनीवाग्देवता च एज्ञा सर्वेश्वरी त
तः कौलिनीवाग्देवता च एज्ञा सा मूर्तियामध्ये गंधायततश्रस्नाद्यैर्मूल
देवीं वतर्पयेत् वामक्रमेण संस्थापणमेयोनिमुद्रया वाग्देवता हृ
कं स्मरक ञयैर्विशेषतः ॐ ऐं नरालचक्रायदत्वाञ्जलिं ततः द
त्तायोहस्तकमले देव्याः पश्चिमभागके न्नंभणः कामबाणाश्चवामा
योहस्तभागके मोहनंकामयन्त्रश्च दक्षिणेदेवितत्करे वशीकारंका

© Dharmartha Trust J&K. Digitized by eGangotri

मणांशं कामांकुशं च स्तंभनं वशीकरणमेव एतज्जयेद्राज्ञः पाणिन स
र्वेसिद्धिप्रदायायाज्ञ्यीचक्रायमहेश्वरि दद्यात्पुष्पांजलिं स्तसाधकोत्तम
साधकोत्तमः कामेश्वरी वज्रेश्वरी एतज्जयेद्भगमालिनी क्रमच्चर्यणदेवि
शिविकोणं साधकोत्तमः इति संपूज्य संतर्प्य मूलेन मूलदेवतां सर्वा
नंदमयायायाज्ञ्यीचक्रायमविंदेवि दद्यात्पुष्पांजलिं देवि साधकः सर्व
सिद्धये मूलविद्यां समुच्चार्य समस्तवारं महेश्वरि एतज्जयेत्साधकोत्तम।
श्रीमहात्रिपुरसुंदरी इति संपूज्य संतर्प्य गंधाक्षतप्रसूनकैः

© Dharmartha Trust J&K. Digitized by eGangotri

प. स्पर्शपाद्यैश्चैवनैवेद्यप्रमहनैः तथाष्टौ वटुकायापि दद्या
१२ द्बलिमनन्तरं दद्याद्वैष्णवैर्देवि नैवेद्याचमनीयकं तांबूलछत्र
चामरादर्शिकादीन्निवेदयेत् संक्षोभद्रावणाकृष्टिवशोन्मादमहा
ङ्कुशाः खेचरीबीजयोन्याख्या नवमुद्राः प्रदर्शयेत् सौभाग्यबीज
न्यासेन स्वदेहं व्यापयेच्छिवे देव्यग्रे च जपं कृत्वा पाठं कुर्यात् ततः परं
वर्मसहस्रनामाख्यं तत्स्तोत्रराजस्य पार्वति शिवशक्त्यो महादेवि जपं
तत्समर्पयेत् गुह्यातिगुह्यगोप्त्रीत्वं गृहाणास्मत्कृतं जपं सिद्धि।

© Dharmartha Trust J&K. Digitized by eGangotri

र्भवतु मे देवि त्वत्प्रसादान्महेश्वरि गणेशग्रहन[illegible]योगिनी
राशिरूपिणीं ध्यात्वा न्यासं चरेद्देवि देवदेवो विम[illegible]येन प्रातः
प्रभृति सायान्तं सायादि प्रातरं ततः यत्करोमि जगन्मातस्तदा
स्तु तव पूजनं संहारमुद्रया देवि देवदेवो विसृज्य च स्वयं सदा
शिवो भूत्वा शिवशक्तिःस्वरूपकः त्रैलोके नायको देवि सत्वं च
विहरेदिति प्रयोगांश्चैव वक्ष्येहं महेशी पर्वतनंदिनि उच्चाटं वशी
करणं चाक्षेयं उरात्मने स्तंभनं मोहनं चैव मारणाकर्षणे तथा

© Dharmartha Trust J&K. Digitized by eGangotri

प० वशीकारं नयोच्चारं शान्तिकं पौष्टिकं तथा एतेषां साधनं वक्ष्ये ज
१८ गतां हितकाम्यया स्तम्भनाय न दातव्यं न दृष्टव्यं कदाचन रवौ तु
त्थाय शायनात्कृत्वा प्रेतशृङ्गं तिकं मूलं साधक एवाप्सु जपेद् युत
संख्यया होमो जातीफलैः पीतैः पुष्पैश्च घृतमिश्रकैः शाङ्गसेना
दिदस्यूनां वादिनां स्तम्भनं भवेत् इति स्तम्भनं। सोमे मघा ऋक्षम
ये स्नात्वा कूपजलेन तत् कूपान्तिके मन्त्रं जप्त्वा साधको युतसंख्यया
होमयेत् घृतमिश्रं च माहिषं दधि शर्करं भस्मना तिलकं कुर्या।

© Dharmartha Trust J&K. Digitized by eGangotri

न्मोहयेद्भुवनत्रयं इतिमोहनं। भौमेर्धरात्रसमयेचतुष्पथगतः
सुधीः अयुतंतज्जपेन्मूलंहोमयेत्‌हुतपायसं रक्तचंदनमिश्र
चस्त्रीकेशैश्चसमन्वितं शत्रुःकालसमानोपिमृत्युमेष्यतिनान्य
था इतिमारणं कुजेनिशावसानेतुगत्वाश्मशानालयंजपेत्‌ अयु
तंमूलमंत्रंतुहोमयेत्‌हुतशर्करं कर्णिकारसहस्राणिविल्व।
पुष्पाणिपार्वति रंभाद्यप्सरसश्चापिभवेदाकर्षणंध्रुवं इत्याक
र्षणं। गुरौसूर्योदयंगत्वानदीतीरंचसाधकः मूलमंत्रमहादे

© Dharmartha Trust J&K. Digitized by eGangotri

प० ध्याजपेदयुतसंख्यया होमःसर्पिर्दधिक्षीरमृद्वीकामालतीपुष्पैः
२९ श्रीफलैःसहस्रादेविवशयेद्भुवनत्रयं इतिवशीकरणं। षट्कोणेनि
19 शामुखेगत्वावटमूलेजपेन्मन्त्रं अयुतंसाधकोभक्त्याहोमःकार्य
स्तुसर्पिषा दध्नाद्राक्षाविमिश्रेणगोमूत्रेणचपायसैः शत्रोर्मन्त्री।
दृशस्यापिभवत्युच्चाटनंध्रुवं इत्युच्चाटनं। शनौप्रभातसमयेकृ।
त्वाकर्माह्निकंसुधीः आगत्यार्चनशाख्यांतुजपेन्मन्त्रायुतंशिवे होम
येत्सर्पिरंभोजसहस्राणिचतुर्दश ग्रहाणांदेवकोपानांयन्त्राणां

© Dharmartha Trust J&K. Digitized by eGangotri

राक्षसांतथा उपद्रवाणांसर्वेषांभयानांल्पते लयः क्रूराणा
मतिवृष्टीनांमहाशांतिःप्रजायते इतिशांतिकं। सर्ववारेषु।
सर्वत्रजपेन्मंत्रंसमाहुतं होमयेत्सर्पिरत्नोटमिश्रंचंदनमि।
श्रितं पायसंतक्रमिश्रंचमीनमांससमन्वितं देवतानांमनु
ष्याणांरोगार्तानांमहेश्वरि ब्रह्मादीनांनृपादीनांमहापुष्टिः
प्रजायते इतिपौष्टिकं। इतीदंपटलंगोप्यंप्रथमांगंमहे
श्वरि सारेत्रिपुरसुंदर्यारक्षणीयंस्वपुत्रवत् गुह्यंगुह्यतमं

© Dharmartha Trust J&K. Digitized by eGangotri

प. गोप्यं गोपनीयं स्वयोनिवत् इति श्रीरुद्रयामले तंत्रे देवी भैरव सं
२. वादे महात्रिपुरसुंदरी पटलः समाप्तः ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri